International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 35-37
© 2017 IJSR
www.anantaajournal.com
Received: 09-05-2017
Accepted: 10-06-2017

**लक्ष्मीकान्त-मुर्मु**
शोधछात्रः(एम् फिल्),
संस्कृतविभागस्य,
यादवपुरविश्वविद्यालयस्य,
कोलकाता

**Correspondence**
**लक्ष्मीकान्त-मुर्मु**
शोधछात्रः(एम् फिल्),
संस्कृतविभागस्य,
यादवपुरविश्वविद्यालयस्य,
कोलकाता

# कारकस्य सामान्यलक्षणविमर्शः

**लक्ष्मीकान्त-मुर्मु**

**भूमिका**

करोति इति क्रियां निर्वर्तयति इति व्युत्पत्यानुसारेण क्रियाजनकत्वं कारकत्वमिति कारकलक्षणं भवति। "कारके" इति पाणिनीयसूत्रे करोति कर्तृकर्मादिव्यापदेशान् इति अनुसारेण कारकशब्दः क्रियापरः, सप्तम्यार्थे निरूपितत्वं जनकतावद् पदमत्र अध्याहृयते। तेन क्रियानिरूपितजनकत्वमिति सम्भवति। महाभाष्यकारेणापि उक्तं - "कारक इति संज्ञानिर्देशश्चेति संज्ञिनोऽपि निर्देशः कर्तव्यः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यं। इतरथा हि कर्मसंज्ञाप्रसङ्गश्चाऽकथितस्य - "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति।" नैव दोषः, "कारक" इति महती संज्ञा क्रीयते। संज्ञा च नाम यतो न लघीयः। कुतः एतत्, लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञा यथा विज्ञायेत करोतीति कारकमिति[1]।"

परन्तु, कारकलक्षणविषये विदुषां मतभेदः दृश्यते, श्रीमद्भट्टोजीदीक्षितमतेन - क्रियान्वयित्वं कारकत्वम् इति कारकस्य लक्षणं, अर्थात् क्रियायां अन्वेति इति। करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयति इति व्युत्पत्तेः महासंज्ञया क्रियान्वयित्वं कारकत्वम् इति समायाति। अपि च "कारके" इति सूत्रानुसारेण करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या क्रियापरः कारकशब्दः, क्रियायामित्यर्थः।

अपि चोक्तम् - "अन्वर्था चेयं संज्ञा करोतीति कारकमिति[2]", अग्रेऽपि

अत्र कारकशब्दः क्रियापरः, करोतीति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्त्या, तथा च अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्ययिनामेव तत्तत्संज्ञाः स्युः [3]। प्रौढमनोरमायामुक्तम् - "अन्वर्थाचेयं संज्ञा-करोति कारकमिति, तेन क्रियान्वयिनो न भवति [4]।" प्रकृतलक्षणे क्रियापदं तु "राज्ञः पुरुषः" इत्यादौ नामार्थन्वयिनः राज्ञः कारकत्वापत्तिरतस्तद्वारणाय।

---

1 कारके(१-४-२३) इति सूत्रे महाभाष्ये
2 कारके(१-४-२३) इति सूत्रे शब्दकौस्तुभे
3 तत्रैव सूत्रे शब्दकौस्तुभे
4 कर्तुरीप्सिततमं कर्मः(१-४-४७) इति सूत्रे प्रौढमनोरमायां

### नैयायिकानां मते दोषोद्भावनम्

"क्रियान्वयित्वं कारकत्वम्" रइति लक्षणं न युक्तं "कुमार्य इत कान्तस्य त्रस्यन्ति स्पृहयन्ति" च इति उदाहरणे षष्ठ्यर्थस्यापि कारकत्वापत्तिः। अतः लक्षणे षष्ठ्यर्थभिन्नत्वम् इति पदं योजनीयं तेन उदाहरणस्य सङ्गतिः। परन्तु "तण्डुलस्य पाकः" इत्यादौ षष्ठ्यर्थभिन्नत्वम् इति कारकलक्षणे योजिते "तण्डुलस्य पाकः" इति उदाहरणे कारकत्वं न सम्भवति, परन्तु इष्यते च तस्य कारकत्वं। अतः लक्षणे उक्तदोषवारणाय - "कृद्युक्तान्यषष्ठ्यर्थभिन्नत्वे सति क्रियान्वयित्वं कारकत्वमिति" स्वीकरणीयं। परन्तु एवं प्रकारेण "तण्डुलस्य पाकः" इत्यादौ दोषवारणेऽपि न शान्तिः। "शेषे षष्ठी" इति सूत्रेण सम्बन्धमात्रविवक्षायां षष्ठी तत्रातिव्याप्तिः एवं अन्यत्रापि दोषो बोध्यः।

### नैयायिकोद्भावितदोषोद्धारः

"क्रियान्वयित्वं कारकत्वम्" इति लक्षणे नैयायिकाः अविचिन्त्यैव ये दोषाः दर्शिताः यथा - "कुमार्य इव कान्तस्य त्रस्ययन्ति स्पृहयन्ति च" इत्यत्र षष्ठ्यर्थस्य क्रियायामन्वयेन कारकत्वापत्तिः तत् दोषयुक्तमिति न "भोगाय" इति पदस्य अध्याहारे "कुमार्य कान्तस्य भोगाय त्रस्यन्ति स्पृहयन्ति च" इति व्याख्यानेन षष्ठ्यर्थस्य नामार्थे अन्वये दोषाभावो भवति। अथवा विभक्तिविपरिनामेन - "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" व्याख्याने न दोषः। तथा चोक्तं प्रौढमनोरमायां श्रीमद्भट्टोजीदीक्षितः - "कुमार्य इवेत्यत्र तु विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति व्याख्येयम् [5] ।" श्रीनागेशभट्टेनापि स्पृहेरीप्सितः सूत्रव्याख्यानप्रसङ्गे - "अन्ये तु भोगाय इत्यध्याहृत्य कान्ताय इति विभक्तिविपरिणामेन वा व्याख्येयमित्याहुः[6]।"

अत्र "शेषे षष्ठी" इति सूत्रविषये उच्यते उक्ताद् योऽन्यार्थः सः शेषः, श्रीमद्भट्टोजीदीक्षितेन उक्तं - "कारकप्रातिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः[7]", अर्थात् तत्रैव षष्ठी भवति। श्रीमद् भर्तृहरिणापि प्रोक्तं वाक्यपदीये साधनसमुद्देशनामक प्रकरण सम्बन्धविषये -

"सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते।।[8]" इति।

अपि च यद्यपि सर्वत्रापि कारकत्वं क्रियाकारकभावसम्बन्धश्चास्ति तन्निमित्तश्च स्वस्वामिभावादिसम्बन्धोऽप्यस्ति। अतः "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यत्र सम्प्रदानस्य अविवक्षायामत्र षष्ठी, अतस्तस्य क्रियायामन्वयेऽपि न क्षतिः। क्रियाकारकभावं विना षष्ठ्यसम्भवात् अत एव "वृक्षस्य शाखा" इतिवत् "पर्वतस्य वृक्षः" इत्यादयः प्रयोगाः न भवन्ति।

### श्रीमन्नागेशस्य मतम्

आचार्यनागेशस्य मते "क्रियाजनकत्वं कारकत्वम्" इति लक्षणे क्रियाजनकत्वं नाम क्रियानिष्ठजन्यतानिरूपितजनकताश्रयत्वम् इति। क्रिया नाम व्यापारः फलञ्च। परन्तु योगात् फलार्थस्य ग्रहणेऽपि योगारूढ्यात्र व्यापारस्यैव ग्रहणं। व्यापारश्च धातुवाच्यः। यथा "चैत्रः काष्ठैः स्थाल्यां तण्डुलं पचति" इति उच्यमाने कर्मादिनां तत्तदाश्रयत्वात् तेषां समेषां कारकत्वं सिद्ध्यति। एतदेवोक्तं नागेशेन - "सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वं बौध्यम्[9]।" अर्थात् क्रियायां प्राधान्यं फलजनकत्वरूपं बोध्यं। परन्तु "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यत्र न कारकत्वं अन्यथासिद्धत्वात् यथा रासभादेः इति, यतो हि घटस्य उत्पत्तौ रासभादेः अन्यथासिद्धत्वं भवति तथैव ब्राह्मणस्यापि।

एवं सम्बन्धस्य न कारकत्वं क्रियाजनकत्वाभावात्। अपि च केचित् "विप्राय धनं दास्यामि" इत्यादि दानग्रहणकर्तुरसत्वेऽपि तज्ज्ञानमात्रेण यत्र दानं तत्र

---

5 स्पृहेरीप्सितः(१-४-३७) इति सूत्रे प्रौढमनोरमायां

6 तत्रैव लघुशब्देन्दुशेखरे

7 शेषे षष्ठी(२-३-५०) इति सूत्रे वैयाकरणसिद्धान्तकौमुद्यां

8 वाक्यपदीये साधनसमुद्देशे का.१५६.

9 कारके(१-४-२३) इति सूत्रे

तस्य दानक्रियारूपकार्यपूर्ववृत्तित्वाभावेन कारणत्वं न स्याद् तेन कथं कारकत्वमिति चेत् श्रीमन्नागेशेन उक्तं - "असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालकत्वेनैव जनकत्वमिति [10] ", अथवा - वैयाकरणानां मते बोद्धार्थस्यैव स्वीकारेऽपि जनकत्वमस्त्यैव अतो न दोषोलेशोऽपि, यतो हि उक्तं - "घटं करोति, स्मरति, इत्यादौ बोद्धघटादेः पूर्वकालिकत्वेन स्मृत्यादीनां निष्पादकत्वं बोद्धयम्[11]।"

अतः क्रियाजनकत्वं कारकत्वम् इति लक्षणं साधुः क्रियाजनकत्वं न कारकत्वमिति व्याख्याने असदुत्पद्यते इति आचार्याणां मतम्।

**सहायकग्रन्थाः**


१) दीक्षितः, श्रीमद्भट्टोजी. वैयाकरणसिद्धान्तकौमुदी. सम्पा. शर्मा, श्रीबालकृष्णपञ्चोलिना. पण्डितश्रीसभापतिशर्मोपध्यायविरचितया "लक्ष्मी" व्याख्ययोपेता. वाराणसी : मोतीलाल बनारसीदास. १९६६(प्रथमसंस्करणं).

२) दीक्षितः, श्रीमद्भट्टोजी. वैयाकरणसिद्धान्तकौमुदी. सम्पा. शर्मा, लक्ष्मीः. "श्रीधरमुखोल्लासिनी" हिन्दीव्याख्यासमन्विता(समासान्तः द्वितीयभागः). वाराणसी : चौखम्बा सुरभारती प्रकाशन.

३) भट्टः, नागेशः. लघुशब्देन्दुशेखरः(कारकप्रकरणम्). सम्पा. शर्मा, डा.तेजपालः. भैरवमिश्रकृतया "भैरवी"व्याख्यया डा.तेजपालशर्माकृत हिन्दीव्याख्यया समन्वितः. वाराणसी : सम्पूर्णानन्द संस्कृतविश्वविद्यालयः. २००२(प्रथमसंस्करणं).

४) भट्टः, श्रीमन्नागेशः. परमलघुमञ्जूषा. सम्पा.व्याख्याकारश्च. त्रिपाठी, प्रो.जयशङ्करलालः. "भावप्रकाशिका" "बालबोधिनी" संस्कृत-हिन्दी-व्याख्योपेता. वाराणसी : चौखम्बा कृष्णदास अकादेमी.

५) दीक्षितः, श्रीमद्भट्टोजी. प्रौढमनोरमा(कारकभागः). सम्पा.व्याख्याकारश्च. पाण्डेयः, डा.रमाकान्तः. शब्दरत्न-भैरवी "आयुषी" हिन्दीव्याख्याविभुषिता. वाराणसी : चौखम्बा विद्याभवन.

६) दीक्षितः, श्रीमद्भट्टोजी. वैयाकरणसिद्धान्तकौमुदी. सम्पा. महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा संशोध्य सम्पादिता. वाराणसी : मोतीलाल बनारसीदास. १९७७(प्रथमसंस्करणं).

७) श्रीमद्पतञ्जलिः. व्याकरणमहाभाष्यम्. संशोधकः. शस्त्री जोशी, श्रीभार्गवः. भाष्यप्रदीपोद्योतसमुल्लासितम्. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान.


10 लघुशब्देन्दुशेखरे कारकप्रकरणे १-४-२३ इति सूत्रे

11 तत्रैव